# ॥ श्री गरूड ध्वज स्तोत्र ॥
# Shri Garur Dhwaj Stotra

## ॥ ॐ गण गणपतये नमः ॥

### ध्रुव उवाच

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
संजीयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरूषाय तुभ्यम् ॥१॥

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरूगुणया महदाद्यशेषम् ।
सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारूषु विभावसुवद्विभासि ॥२॥

त्वद्दत्तया वयुनयेदमचष्ट विश्वं
सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ।
तस्यापवर्ग्यशरणं तव पादमूलं
विस्मर्यते कृतविदा कथमार्तबन्धो ॥३॥

नूनं विमुष्टमतयस्तव मायया तेये
त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरू कुणपोपभोग्य
मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥४॥

या निर्वृतिस्तनुभृतां तव पादपद्म
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किन्त्वन्तकासिलुलितात् पततां विमानात् ॥५॥

भक्तिं मूहु: प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्त महताममलाशयानाम् ।
येनाञ्जसोल्बणमुरूव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्त: ॥ ६ ॥

ते न स्मरन्त्यतितरां प्रियमीशमर्त्यं
ये चान्वद: सुतसुहृद्गृहवित्तदारा: ।
ये त्वब्जनाभ भवदीयपदारविन्द
सौगंध्यलुब्धहृदयेषु कृतप्रसङ्गा: ॥ ७ ॥

तिर्यङ्मगद्विजसरीसृपदेवदैत्य
मर्त्यादिभि: परिचितं सदसद्विशेषम् ।
रूपम् स्थविष्ठमज ते महदाद्यनेकं
नात:परं परम वेद्मि न यत्र वाद: ॥ ८ ॥

कल्पान्त एतदखिलं जठरेण गृह्वन्
शेते पुमान् स्वदृगनन्तसखस्तदङ्के ।
यन्नाभिसिन्धुरूहकाञ्चनलोकपद्म
गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥ ९ ॥

त्वं नित्यमुक्तपरिशुद्धविशुद्ध आत्मा
कूटस्थ आदिपुरूषो भगवांस्त्र्यधीश: ।
यद्बुद्धयवस्थितिमखण्डितया स्वदृष्टया
द्रष्टा स्थितावधिमखो व्यातिरिक्त आस्से ॥ १० ॥

यस्मिन् विरूद्धगतयो ह्यनिशं पतन्ति
विद्यादयो विविधशक्तय आनुपूर्व्यात् ।
तद्भह्म विश्वभवमेकमनन्तमाद्यम
अनन्दमात्रमविकारमहं प्रपद्ये ॥ ११ ॥

सत्याशिषो हि भगवंस्तव पादपद्म

माशीस्तथाऽनुभजतः पुरुषार्थमूर्तेः ।
अप्येवमार्य भगवान् परिपाति दीनान्
वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥१२॥

**मैत्रेय उवाच**

अथाभिष्टुत एवं वै सत्सङ्कल्पेन धीमता ।
भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् ॥१३॥

**श्री भगवानुवाच**

वेदाहं ते व्यवसितं हृदि राजन्यबालक ।
तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥१४॥
नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति ।
यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् ॥१५॥

मेढ्यां गोचक्रवत्स्थास्नु परस्तात् कल्पवासिनाम् ।
धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥
चरन्ति दक्षिणोकृत्य भ्रमन्तो यत्सतारकाः ॥१६॥

प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः ।
षत्त्रिंशद्वर्षसाहस्रं रक्षिताऽव्याहतेन्द्रियः ॥१७॥
त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ।
अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥१८॥

इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ।
भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि ॥१९॥
ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतम् ।
उपरिष्ठादृषिभ्यस्त्वं यतो नावर्तते गतः ॥२०॥

**मैत्रेय उवाच**

इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् ।
बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥२१॥

॥ इति श्री गरुड ध्वज स्तोत्रं सम्पूर्णम् ॥

allastrologysolutions.com